# Shri Kalpakaganeshapancharatna Stava

# શ્રીકલ્પકગણેશપઞ્ચરત્નસ્તવઃ

## Document Information

Text title : Shri Kalpakaganeshapancharatna Stava

File name : kalpakagaNeshapancharatnastavaH.itx

Category : ganesha, pancharatna

Location : doc_ganesha

Proofread by : Aruna Narayanan

Description/comments : From shrInaTarAjastavamanjarI

Latest update : July 10, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 10, 2022

*sanskritdocuments.org*

# શ્રીકલ્પકગણેશપઞ્ચરત્નસ્તવઃ

શ્રીમદુમાપતિશિવપ્રણીતઃ

શ્રીમત્તિલ્વવને સભેશસદન-પ્રત્યક્કકુબ્ગોપુરા-
ધોભાગસ્થિત ચારુસદ્મવસતિર્ભક્તેષ્ટકલ્પદ્રુમઃ ।
નૃત્તાનન્દમદોત્કટો ગણપતિઃ સંરક્ષતાદ્વોઽનિશં
દૂર્વાસઃ પ્રમુખાખિલર્ષિ વિનુતઃ સર્વેશ્વરોઽગ્ર્યોઽવ્યયઃ ॥ ૧॥

શ્રીમત્તિલ્લવનાભિધં પુરવરં ક્ષુલ્લાવુકં પ્રાણિનાં
ઇત્યાહુર્મુનયઃ કિલેતિ નિતરાં જ્ઞાતું ચ તત્સત્યતામ્ ।
આયાન્તં નિશિ મસ્કરીન્દ્રમપિ યો દૂર્વાસસં પ્રીણયન્
નૃત્તં દર્શયતિ સ્મ નો ગણપતિઃ કલ્પદ્રુકલ્પોઽવતાત્ ॥ ૨॥

દેવાન્ નૃત્તદિદૃક્ષયા પશુપતેરભ્યાગતાન્ કામિનઃ
શક્રાદીન્ સ્વયમુદ્ધૃતં નિજપદં વામેતરં દર્શયન્ ।
દત્વા તત્તદભીષ્ટવર્ગમનિશં સ્વર્ગાદિલોકાન્વિભુઃ
નિન્યે યઃ શિવકામિનાથતનયઃ કુર્યાચ્છિવં વોઽન્વહમ્ ॥ ૩॥

અસ્માકં પુરતશ્ચકાસ્તુ ભગવાન્ શ્રીકલ્પકાખ્યોઽગ્રણીઃ
ગોવિન્દાદિ સુરાર્ચિતોઽમૃતરસપ્રાપ્ત્યૈ ગજેન્દ્રાનનઃ ।
વાચં યચ્છતુ નિશ્ચલાં શ્રિયમપિ સ્વાત્માવબોધં પરં
દારાન્ પુત્રવરાંશ્ચ સર્વવિભવં કાત્યાયનીશાત્મજઃ ॥ ૪॥

વન્દે કલ્પક કુઞ્જરેન્દ્રવદનં વેદોક્તિભિસ્તિલ્વભૂ-
દેવૈઃ પૂજિતપાદપદ્મયુગલં પાશચ્છિદં પ્રાણિનામ્ ।
દન્તાદીનપિ ષડ્ભુજેષુ દધતં વાઞ્છાપ્રદત્વામયે
સ્વાભ્યર્ણાશ્રયિકામધેનુમનિશં શ્રીમુખ્યસર્વાર્થદમ્ ॥ ૫॥

ઔમાપત્યમિમં સ્તવં પ્રતિદિનં પ્રાતર્નિશં યઃ પઠેત્
શ્રીમત્કલ્પકકુઞ્જરાનન-કૃપાપાઙ્ગાવ લોકાન્નરઃ ।
યં યં કામયતે ચ તં તમખિલં પ્રાપ્નોતિ નિર્વિઘ્નતઃ

કૈવલ્યં ચ તથાઽન્તિમે વયસિ તત્સર્વાર્થસિદ્ધિપ્રદમ્ ॥ ૬॥

ઇતિ શ્રીમદુમાપતિશિવપ્રણીતઃ શ્રીકલ્પકગણેશપઞ્ચરત્નસ્તવઃ સમ્પૂર્ણઃ ।

Proofread by Aruna Narayanan

*Shri Kalpakaganeshapancharatna Stava*

pdf was typeset on July 10, 2022

Please send corrections to *sanskrit@cheerful.com*